श्री भगवत् समर्चा



रचयिता

गायत्रीस्वरूप ब्रह्मचारी

मुमुक्षु भवन, अस्सी,

वाराणसी - ५

★ श्री भगवत् समर्चा ★

(पूर्वार्द्धः)

रचयिता

श्री गायत्रीस्वरूप ब्रह्मचारी, वेदान्ताचार्य

अक्षय तृतीया संवत् २०३८]

प्रकाशक एवं वितरक :
गायत्रीस्वरूप ब्रह्मचारी
मुमुक्षुभवन, अस्सी, वाराणसी--५

संस्करण द्वितीय
वि० सं० २०३८

मूल्य : भगवद् भक्ति

पूर्वार्द्धका प्राक्कथन

प्रथम संस्करण

चौरासी लक्षयोनियों में मनुष्य योनि सर्वश्रेष्ठ है। प्रभूत पुण्य द्योतक इस मानव शरीर को पाकर कर्त्तव्याकर्त्तव्य में हमें शास्त्र प्रमाण ही मानना चाचिए। आगे चलकर यही शास्त्र हमारे लिए सच्चिदानन्द प्रभु की प्राप्ति को ही मानव जीवन की सफलता का बोध्र करते हैं। शास्त्रोक्त उपासना पद्धतियोंमें साधक को साध्य की सिद्धो में भक्ति ही एकमात्र सरलतम साधन है। भक्त एवं भक्ति दोंनों की महिमा भगवत् प्रतिपादित ही है। भक्ति सुत्रोंपनद्ध श्री हरि अपने लोक का सर्वथा त्याग कर भक्त के हृदय में निवास करते हैं। इसो विश्वास के साथ प्रार्थना स्तुति एवं आरती रूप प्रसून को सर्वान्तर्यामी प्रभु के चरणों में अर्पित कर रहा हूं। मात्र हमारी लोकेषणा है कि प्रभुचरणों में सबका प्रेम बना रहे।

श्रीकृष्णार्पणमस्तु

विनीत :

गायत्री स्वरूप ब्रह्मचारी

(अनन्त चतुर्दशी संवत् २०२८)

उत्तरार्द्ध की भूमिका

प्रथम संस्करण

पुण्यपुञ्ज इस मानव शरीर को प्राप्त करके हमें नित्यानित्य वस्तु का विचार करना चाहिए। नित्य सच्चिदानन्द प्रभुकी उपासना से मोक्ष पद प्राप्त होता है। अनित्य-दृश्य प्रपञ्च जगत्की उपासना से इस संसार में ही जन्म और मरण होता रहता है। अपने प्रारब्धानुसार सुख-दुखादि कर्मों को अवश्य भोगना पड़ता है। यह संसारसागर बड़ा अगाध है, इससे पार होने के लिए भगवद्भक्ति ही एकमात्र सरलतम साधन है। अव्यभिचारिणी भक्ति से निर्मल ब्रह्मज्ञान प्राप्त हो जाता है. उस ज्ञान से सदा के लिए मुक्तिपद की प्राप्ति होती है, उस ज्ञानी की दृष्टि में सर्वत्र केवल सच्चिदानन्द प्रभुमात्र रह जाते हैं। उन प्रभु की प्राप्ति के लिए यह भगवत् समर्चा अत्युत्तम है। गुरुवेदान्त वाक्यों में विश्वास करना, भगवत् सम्बन्धी शास्त्रों का अध्ययन तथा मनन करना और अन्तःकरण में भगवान् का जप करना यही सर्वोत्तम साधन है। भगवन्निष्ठ साधकों के हृदय में श्रीहरि सदा निवास करते हैं।

सर्वान्तर्यामी पूर्ण सच्चिदानन्द प्रभु के चरणों में अञ्जलिपुट बाँधकर अर्चना प्रार्थना स्तुतिरूपि प्रसुन को समर्पण कर रहा हूं।

भगवत् प्रेमी सज्जनों से हमारी यही प्रार्थना है कि अपने हृदय कमलमें विराजमान सच्चिदानन्द प्रभु के चरणों में सबका प्रेम बना रहे।

श्रीकृष्णार्पणमस्तु

विनीत :

(विजया दशमी सं० २०३२) गायत्रीस्वरूप ब्रह्मचारी

ॐ



आनन्दमात्रनिजबोधस्वरूपमेकं ।
नित्यैवब्रह्मविलयं त्रिगुणादतीतम् ॥
कैवल्यधामसुगतं सततं सुपूज्यं ।
योगीश्वराश्रमगुरुं सततं नमामि ॥

द्वितीय संस्करण की भूमिका

'श्री भगवत्समर्चा' के ऊपर भक्तजनों की श्रद्धा और इसकी माँग को देखकर दोनों भागों को एक ही आकार में संलग्न करके पूर्वार्द्ध तथा उत्तरार्द्ध के रूप में यथावत् पुनः प्रकाशित करने का प्रबन्ध किया गया है।

आसा है कि इससे श्रद्धालु धार्मिक जनों का लाभ होगा।

विनीत :

गायत्री स्वरूप ब्रह्मचारी

अक्षय तृतीया, २०३८]


लेखक का संक्षिप्त परिचय :

जन्मकाल वैशाख सं० १९९०

नेपालाधिराज्यान्तर्गत मेची अञ्चल फिदिममण्डल सुभाङ
ग्राम निवासी पण्डितप्रवर श्री जनकलाल जी
रेग्मी एवं सौभाग्यवती श्रीमती यशोदा देवीके
सुपुत्र एवं श्रोत्रीयब्रह्मनिष्ठ श्री १०८
स्वामी योगीश्वराश्रम जी के शिष्य
पुण्यप्रसादापरनामा
श्री गायत्रीस्वरूप
ब्रह्मचारी ।

ॐ

* श्री परमात्मने नमः *



गायत्रीस्वरूप ब्रह्मचारी

विषयानुक्रमणिका

(पूर्वार्ध)

संस्कृत में

(उत्तरार्द्ध)

हिन्दी में

(श्रीः)

॥ श्री गणेशाय नमः ॥

गणेश प्रार्थना—

लम्बोदराय शिवपुत्रगणेश्वराय
बुद्धिप्रदाय भवदुःखविनाशकाय ॥
त्रैलोक्यपूज्यपरमाद्भुतकारणाय
विघ्नान्तकाय सुखदाय नमो नमस्ते ॥१॥

सरस्वती प्रार्थना—

वन्दे श्री जगदम्बिकां सरस्वतीं
वन्दे जगद्व्यापिनीं
वन्दे पुस्तकधारिणीं च परमां
वेदान्तसारांशकाम् ॥
वन्दे ब्रह्मस्वरूपिणीं च विमलां
वन्दे जगन्मातरं
वन्दे दुःख विनाशिनीं भगवतीं
चैतन्यरूपां पराम् ॥१॥

॥ श्री गणेशाय नमः ॥

* गणेशाष्टकम् *

अजं निर्मलं निर्गुणं ज्ञानरूपं,
निराकारसंसारसारं परेशम् ॥
जगन्मंगलं विश्ववन्द्यं पवित्रं,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥१॥

प्रसन्नं सदा ब्रह्मरूपं तुरीयं,
सदैकाश्रयं प्राणिनामेकमात्रम् ॥
परं नित्यमानन्दकन्दं निरीहं,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥२॥
गुरुं ज्ञानिनां योगिनां तत्वरूपं,
तथा प्राणिनां विघ्ननाशं गणेशम् ॥
सदा मंगलं पार्वतीपुत्रमेकं,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥३॥
सदूर्वादलं कुङ्कुमं रक्तपुष्पं,
तथा चन्दनं सुन्दरं रक्तवस्त्रम् ॥
सदा धारकं ज्ञानमूर्तिं ह्यखण्डं,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥४॥

सुसौम्यं निजं निर्विकल्पं वरेण्यं,
सुज्ञानं सुखं सत्स्वरूपं सुगम्यम् ॥
सुसिद्धं मुनीशं महेशस्य पुत्रं,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥५॥

सदा ध्यायमाना गणेशञ्च देवाः,
तथा प्रार्थयन्तश्च वेदाः गणेशम् ॥
गणेशाश्रये सन्ति जीवाः समस्ताः,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥६॥

प्रभुं धर्मकामार्थ मोक्षप्रदं तं,
पुनः पुत्रदं ज्ञानदं सर्वदं च ॥
तथा साधकं सर्वकामप्रदञ्च,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥७॥

अहं त्वां सदा प्रार्थये भो गणेश,
प्रसन्नो भवन्न सर्वदा बुद्धिनाथ ॥
परं दर्शनं मां ददातु ह्यनन्त,
प्रभुं सिद्धिदं तं गणेशं नमामि ॥८॥

प्रातःकाले शुचिर्भूत्वा ये पठन्ति नराः सदा ।
श्री गणेशाष्टकं स्तोत्रं सुखदं मोक्षदं भवेत् ॥९॥

श्री गायत्रीस्वरुप ब्रह्मचारिणा विरचितं
श्री गणेशाष्टकं सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

* गुर्वष्टकम् *

अज्ञाननाशकं वन्द्यं पूज्यपाद सरोरूहम् ।
मोक्षदं ज्ञानदातारं प्रणमामि गुरुं परम् ॥१॥
संसारसागरात् शीघ्रमुद्धर्तुमागतं प्रभुम् ।
शिष्याय ज्ञानदं पूज्यं प्रणमामि गुरुं परम् ॥२॥
कैवल्यज्ञानमूर्तिश्च तत्वमस्यादि वाक्यादम् ।
मोक्षार्थपरमाधारं प्रणमामि गुरुं परम् ॥३॥
आज्ञाचक्रे स्थितं नित्यं द्विदलं रक्तवर्णकम् ।
द्व्यक्षरं हंसरूपाख्यं प्रणमामि गुरुं परम् ॥४॥
ब्रह्मा विष्णुश्च रुद्रश्च गुरुरेव न संशयः ।
सच्चिदानन्दरूपं त्वां प्रणमामि गुरुं परम् ॥५॥
असाररूपसंसारादुद्धृत्य परमं पदम् ।
तत्वदं ब्रह्मरूपं त्वां प्रणमामि गुरुं परम् ॥६॥
कुलालचक्रवन्नित्यं भ्रमन्ति च सदा जनाः ।
नौरिव तारकं तेषां प्रणमामि गुरुं परम् ॥७॥
हे गुरो परमानन्द परमं पददर्शनम् ।
कर्तुमिच्छामि तत्वज्ञ प्रणमामि गुरुं परम् ॥८॥
गुर्वष्टकमिदं स्तोत्रं ये पठन्ति नराः सदा ।
ते नराः गुरु शिक्षातः गच्छन्ति परमं पदम् ॥९॥

श्री गायत्रीस्वरुप ब्रह्मचारिणा विरचितं
गुर्वष्टकं सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

* श्रीदुर्गाष्टकम् *

हे मातर्जगदाधारे प्राणिनां प्राणरूपिणि ।
चैतन्यरूपके नित्ये दुर्गे देवि नमोस्तुते ॥१॥
शारदे च परे सत्ये पूर्णरूपे सनातनि ।
ब्रह्माण्डरचिके हंसे दुर्गे देवि नमोस्तुते ॥२॥
चतुर्वक्त्रे महामाये रौद्ररूपे महेश्वररि ।
महाकालीस्वरुपे च दुर्गे देवि नमोस्तुते ॥३॥
प्रणवाक्षरयोर्मध्ये विन्दुरूपे परेश्वरी ।
कैवल्यधामरूपाख्ये दुर्गे देवि नमोस्तुते ॥४॥
सरस्वती च गायत्री सावित्रीरूपधारिणी ।
त्वमेव हे महागौरि दुर्गे देवि नमोस्तुते ॥५॥
महाकाली च लक्ष्मीश्च त्वमेव परमेश्वरि ।
त्वमेव सिद्धिदात्री च दुर्गे देवि नमोस्तुते ॥६॥
महागौरी च भद्रा च शान्ता रौद्रा तथैव च ।
अघोरा घोररूपा च दुर्गे देवि नमोस्तुते ॥७॥
सत्यज्ञानमनन्ताख्ये परब्रह्म स्वरूपिणी ।
कैवल्य ज्ञानमूर्ति त्वां दुर्गे देवि नमोस्तुते ॥८॥
शरणोऽस्मि सदा मातस्तवाहं मुक्तिदायिनी ।
ब्रह्मदर्शनमिच्छामि हे मात जंगदम्बिके ॥९॥

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं
श्री दुर्गाष्टकं सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

* श्री सूर्याष्टकम् *

जगन्नाथमेकं जगत्प्राणरूपं,
जगत्कारणं सर्वदा रक्षकं च ।
जगत्स्वामिनं व्यापकं ह्येकमात्रं,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥१॥
जगन्नायकं विश्ववन्द्यं वरेण्यं,
जगत्स्वामिनं सूर्यमूर्तिं सुपूज्यम् ॥
जगच्चक्षुरूपं प्रकाशं ह्यनन्तं,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥२॥
सदा ह्येकचक्रं प्रभुं देवदेवं,
प्रदीपं महातेजरूपं च शुभ्रम् ॥
सदैवं प्रभुं वेदवेदान्त वेद्यं,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥३॥
सदा सच्चिदानन्दमेकं परेशं,
सदा नेत्रयोः विद्यमान स्वरूपम् ।
सदा मण्डले ब्रह्मरूपं वरेण्यं,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥४॥

निजं निर्गुणं तत्वमस्यादि लक्ष्यं,
सदा निर्मलं सत्यमानन्दमेकम् ॥
सदाऽद्यन्तशून्यं च तेजो ह्यखण्डं,
स्वयं ज्योतिरूप च सूर्यं नमामि ॥५॥
यं रूपकं वेदविदो स्मरन्ति,
गच्छन्ति यन्मण्डलं तत्ववन्तः ॥
गायन्ति यं रूपकं सामवेदाः,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥६॥
चतुर्बाहुकं कुण्डलं रत्न युक्तं,
किरीटं तथा रक्तवस्त्रं च सौम्यम् ॥
सदा वालखिल्यादिभिः स्तुत्यरूपं,
स्वयं ज्योतरूपं च सूर्यं नमामि ॥७॥
जगत्सर्जको ब्रह्मरूपस्त्वमेव,
जगत् पालको विष्णुरूपस्त्वमेव ॥
जगन्नाशको रूद्ररूपस्त्वमेव,
स्वयं ज्योतिरूपं च सूर्यं नमामि ॥८॥
समर्पयामि सूर्याय सूर्याष्टकमिदं स्तवम् ।
तव दर्शनमिच्छामि प्रसन्नो भव सर्वदा ॥९॥

श्रीगायत्रीस्वरूप ब्रह्मचारिणा विचरितं

श्री सूर्याष्टकं सम्पूर्णम्

॥ श्री गणेशाय नमः ॥

* श्री शिवाष्टकम् *

सदा निर्विकल्पं सदा चित्स्वरूपं
सदा सत्स्वरूपं सदाऽनन्दरूपम् ॥
सदा पूर्णरूपं सदा नित्यरूपं
सदैकस्वरूपं शिवं त्वां नमामि ॥
सदा निर्गुणं सद्गुणं वा सदैव
सदाऽनन्तरूपं च एकं सदैव ॥
सदा शान्तरूपं च शुभ्रं सदैव
सदैकस्वरूपं शिवं त्वां नमामि ॥२॥
सदा ज्ञानिनां ज्ञानरूपं त्वमेव
सदा योगिनां ध्यानगम्यं त्वमेव ॥
सदा प्राणिनां प्राणरूपं त्वमेव
सदैकस्वरूपं शिवं त्वां नमामि ॥३॥
सदा ब्रह्मणा प्रार्थनीयस्वरूपं
सदा विष्णुना वन्दनीयस्वरूपम् ॥
सदा धामतत् चिद्घनानन्दरूपम्
सदैकस्वरूपं शिवम् त्वां नमामि ॥४॥

सदा वेदशास्त्रेण स्तुत्यं महेशं
सदा देवदेवादिदेवं महेशम् ॥
सदा ब्रह्मसूत्रादिमृग्यं महेशं
सदैकस्वरूपं शिवं त्वां नमामि ॥५॥

सदा सृष्टिनां सर्जकं तं महेशं
सदा सृष्टिनां पालकं तं महेशम् ॥
सदा सृष्टिनां नाशकं तं महेशं
सदैकस्वरूपं शिवं त्वां नमामि ॥६॥

सदा सर्वदा चिन्तनीयं महेशं
सदा सर्वदा वन्दनीयं महेशम् ॥
सदा सर्वदा कीर्तनीयं महेशं
सदैकस्वरूपं शिवं त्वां नमामि ॥७॥

सदा शुद्ध बुद्धं सदा मुक्तरूपं
सदाऽनन्तमेकं सदा चित्स्वरूपम् ॥
सदा सर्वदा निर्मलं नित्यरूपं
सदैकस्वरूपं शिवं त्वां नमामि ॥८॥

इदं शिवाष्टकं स्तोत्रं भक्ति श्रद्धासमन्वितः
निवेदयाम्यहं शम्भो प्रसन्नो भव सर्वदा ॥९॥

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं
श्री शिवाष्टक सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

श्री रामाष्टकम्

श्री रामं करुणानिधिं च परमं
पूज्यं महद्रूपकं,
मायातीतमजं च नित्यविमलं
ह्येकं जगद्व्यापकम् ॥
वाशिष्ठयादि ऋषीश्वरैः प्रतिदिनं
ब्रह्मैव जानन्ति यं,
सत्यं श्यामल सुन्दरं च सुखदं
श्रीरामचन्द्रं भजे ॥१॥

रामं श्यामलकोमलाङ्गसुतनुं
सीतापतिं सुन्दरं
रामं भक्तप्रियञ्च धार्मिकरघो-
वंशस्य सद्भूषणम् ॥
रामं नीतिप्रियं च ब्राह्मणप्रियं
सत्यप्रियं धार्मिकं
सत्यं श्यामल सुन्दरञ्च सुखदं
श्री रामचन्द्रं भजे ॥२॥

रामं कण्टकरावणान्तकरणं
सीतासुरक्षाकरं
रामं भक्तविभीषणाय सुखदं
लङ्कापुरी दायकम्
रामं लक्ष्मणपूर्वजञ्च भरत-
शत्रुघ्नपूज्यं परम्
सत्यं श्यामलसुन्दरञ्च सुखदं
श्री रामचन्द्रं भजे ॥३॥

कौशल्या दशचक्रि राजतनयं
रामाद्यनारायणं
नानावस्त्रविभूषणादिसहितं
हस्ते धनुर्वाणकम् ॥
कर्णौ कुण्डलहेमरत्नजटितं
रूपं सदा रम्यकम्
सत्यं श्यामलसुन्दरं च सुखदं
श्री रामचन्द्रं भजे ॥४॥

सर्वस्मिन् जगतीतले च भुवने
त्वं प्राणिनां प्राणदः,

सर्वात्मासि च ज्ञानियोगिमुनिनां
त्वं ज्ञानदो मोक्षदः ॥
भक्तानां च सुरक्षकं प्रतिदिनं
चैतन्यरूपं परम्
सत्यं श्यामलसुन्दरं च सुखदं
श्री रामचन्द्रं भजे ॥५॥
त्वं सूर्योऽसि यमेन्द्रधर्ममरुतां
रूपोऽसि ब्रह्मात्मको
रुद्रव्यासशुकात्मकश्च वरुण-
श्चन्द्रोऽसि कृष्णात्मकः ॥
अध्यात्मानमखण्डरूपमनघं
साङ्ख्यादिवेद्यं प्रभुं
सत्यं श्यामलसुन्दरञ्च सुखदं
श्री रामचन्द्रं भजे ॥६॥
कैवल्यात्मक शान्त ! हे रघुपते
सीतापते हे प्रभो
ब्रह्मानन्दस्वरूप हे गुणनिधे
लक्ष्मीपते हे विभो ॥

हे विश्वम्भर सत्स्वरूप भगवन्
हे शुद्धबोधात्मक
सत्यं श्यामल सुन्दरञ्च सुखदं
श्री रामचन्द्रं भजे ॥७॥

हे त्रैलोक्यपते चराचरगुरो
हे विश्वसचालक
हे आदर्शचरित्र हे नरहरे
ब्रह्माण्डसंरक्षक ॥

सौमित्री हनुमत्प्रियं प्रतिदिनं
सुग्रीवमित्रं प्रभुम्
सत्यं श्यामलसुन्दरञ्च सुखदं
श्री रामचन्द्रं भजे ॥८॥

समर्पयामि हे राम रामाष्टकस्तवं प्रभो
नमामि भगवन् राम प्रसन्नो भव सर्वदा ॥९॥

श्री गायत्रीस्वरूप ब्रह्मचारीणा विरचितं
रामाष्टकम् सम्पूर्णम्

॥ श्री गणेशाय नमः ॥

* श्री कृष्णाष्टकम् *

पूर्णानन्दमनन्तमद्वयमजं
सच्चित्सुखं श्रीहरिं
तुर्यातीतमखण्डमेकमचलं
सानन्दकन्दं हरिम् ॥
नानारूपधरं च ह्येकमगुणं
त्रैलोक्यवन्द्यं हरिम्
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥१॥
मालाचन्दनकुंकुमं च तुलसी-
पत्रं धरं सुन्दरम्
कर्णे हेमसुवर्णकुण्डलधरं
पीतं च वस्त्रं धरम् ॥
नानारत्नमयं सुसौम्यमुकुटं
पत्रं मयूरं धरम्
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥२॥
अङ्गं मेघसमं च नेत्रकमलं
रूपं सदा श्यामलम्

पादाम्भोजसमं च नित्यसुखदं
दृश्यं सदा शोभनम् ॥
तेजोमूर्तिसमानसूर्यविमलम्
लक्ष्मीपतिं केशवं
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥३॥

हस्ते चक्रधरं तथैव मुरली-
वाद्यंधरं सुन्दरम्
शत्रोरन्तकरं च नित्यसुखदं
भक्ताय दत्तं वरम् ॥
ब्रह्मानन्दसुरेन्द्रसूर्यमरुतः
स्तुन्वन्ति यं तं परम्
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥४॥

ब्रह्मानन्दवरिष्ठब्रह्ममुनयो
ध्यायन्ति यद् रूपकं
वेदैः नित्यनिरन्तरोपनिषदैः
गायन्ति यद् रूपकम् ॥
कालातीतममात्मव्यापकमजं
कैवल्यचिद्रूपकम्

सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥५॥

ऊर्ध्वं नालमधोमुखं च कमलं
ऊर्ध्वं प्रकाशं कृतं
कृष्णं ब्रह्मसनातनं च परमम्
हृत्पुण्डरीके स्थितम् ॥
सूक्ष्मात्सूक्ष्मतरं महान्नतिमहान्
कैवल्यधामाख्यकं
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥६॥

मायातीतमगण्यरूपमगुणं
वा सद्गुणं तं परं
अज्ञानान्तकरं यथा प्रतिदिनं
ज्ञान प्रदं तं हरिम् ॥
उत्पत्तिस्थितिनाशकञ्चलयकं
विश्वस्य त्वां कारणं
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचंद्रं भजे ॥७॥

भक्तानां कृपया च पूर्णदयया
धर्मार्थकाम प्रदं
सर्वैश्वर्यप्रदं च नित्य सुखदं
ज्ञानप्रदं मोक्षदम् ॥
जन्माद्यन्तकरं च मोक्षफलदं
तद्धामरूपं परं
सत्यानन्दमनन्तज्ञानममलं
श्री कृष्णचन्द्रं भजे ॥८॥

निवेदयामि हे कृष्ण कृष्णाष्टकमिदं स्तवम् ।
भूयो भूयो नमस्तुभ्यमहं त्वां शरणागतः ॥९॥

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं

श्री कृष्णाष्टकं सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

✵ श्री विष्णवष्टकम् ✵

जगन्नाथं विश्ववन्द्यं शङ्ख पद्म गदा धरम् ।
तथा चक्रधरं देवं तं विष्णुं प्रणमाम्यहम् ॥१॥
तुलसी वनमाला च पद्ममाला धरं प्रभुम् ।
चतुर्भुजं नीलवर्णं तं विष्णुं प्रणमाम्यहम् ॥२॥
किरीटं कुण्डलं रम्यं पीतवस्त्रधरं विभुम् ।
श्रीवत्सचिह्नसंयुक्तं तं विष्णुं प्रणमाम्यहम् ॥३॥
आजानुबाहुकं शान्तं लक्ष्मीकान्तं मनोहरम् ।
मुकुटं रत्नसंयुक्तं तं विष्णुं प्रणमाम्यहम् ॥४॥
मुखसुन्दरपद्माक्षं कर्णकुण्डलसुन्दरम् ।
पद्मनाभस्वरूपं च तं विष्णुं प्रणमाम्यहम् ॥५॥
क्षीरसागरमध्यस्थं नागासनकरं प्रभुम् ।
नारायण इति ख्यातं तं विष्णुं प्रणमाम्यहम् ॥६॥
ब्रह्मशङ्करविष्ण्वादि स्तुतिं कुर्वन्ति सर्वदा ।
सच्चिदानन्दरूपाख्यं तं विष्णुं प्रणमाम्यहम् ॥७॥
सत्यज्ञानमनन्तं च परब्रह्मस्वरूपकम् ।
ममात्मव्यापकं ह्येकं तं विष्णुं प्रणमाम्यहम् ॥८॥
विष्ण्वष्टकमिदं स्तोत्रं श्रद्धया निर्मिता मया ।
समर्पयाम्यहं विष्णो प्रसन्नो भव सर्वदा ॥९॥

श्री गायत्रीस्वरूप ब्रह्मचारीणा विरचितं
श्री विष्णवष्टकं सम्पूर्णम् ॥

॥ श्री गणेशाय नमः ॥

(उत्तरार्द्धः)

★ श्रीकृष्ण मानसिक पूजा ★

ध्यानम्—

वन्दे श्रीकृष्णचन्द्रं छवियुगलयुतं राधिकानाथमेकं
वन्दे वेदान्तसारं परमपदमजं दिव्यकैवल्यधामम् ॥
वन्दे शुद्धात्मरूपं गुणरहितनिजं ज्ञानिनां ज्ञानगम्यं
वन्दे देवाधिदेवं सकलगुणनिधिं कृष्ण त्रैलोक्यनाथम् ॥

(१)

आवाहनम्—

सच्चित्स्वरूपात्मकवासुदेवं
कैवल्यधामं परमं पवित्रम् ॥
एकाक्षरं निर्मलतत्वमात्रं
आवाहयाम्यात्मस्वरूपमेकम् ॥

(२)

आसनम्—

रम्ये सदा स्वच्छसुवर्णनिर्मिते
देदिप्यमाने मनसोऽभिरञ्जने ॥
रत्नासने तिष्ठतु वासुदेव !
गोविन्द ! योगेश्वर ! गोकुलेश ! ॥

(३)

पाद्यम्—

श्रीविष्णुपादार्चनयोग्यमुत्तमं
देवादिवन्द्यं परमं पवित्रम् ॥
गंगाजलं शुद्धमिदं हि निर्मितं
पाद्यञ्च कृष्णाय समर्पयामि ॥
(४)

अर्घ्यम्—

गंधाक्षतैश्चैव सुगन्धिपुष्पैः
गंगाजलै निर्मितशुद्धमर्घ्यम् ॥
त्रैलोक्यनाथाय परात्पराय
तुभ्यं च कृष्णाय समर्पयामि ॥
(५)

आचमनीयम् –

संपूर्ण तीर्थाम्ब्वमलं शिवं जलं
सुगन्धसम्पन्नमिदं मनोहरम् ॥
आचम्यतामाचमनीयमेतद्
हेकृष्ण ! सर्वात्मक ! वासुदेव ! ॥
(६)

स्नानीयम्—

मन्दाकिनी दिव्यसरस्वती तथा
गंगा च रेवा यमुना च नर्मदा ॥
नारायणीत्यादि नदी जलैर्हरे !
स्नानीयमेतद्धि समर्पयामि ॥
(७)

पञ्चामृतस्नानम्—

चित्तेन सङ्कल्पितशुद्धगोघृतं
दुग्धं दधीक्षोरसमाक्षिकान्वितम् ॥
सौगन्धिकैर्द्रव्यगणैश्च संयुतं
पञ्चामृतं कृष्ण ! समर्पयामि ॥

(८)

शुद्धोदकस्नानम्—

हे कृष्ण ! सर्वोत्तम ! दिव्यरूप !
हे देवकीनन्दन ! रुक्मिणीश ! ॥
हे द्वारकानाथ ! जगत्पते ? प्रभो !
स्नानं च शुद्धोदकमर्पयामि ॥

(९)

उद्वर्तनस्नानम्—

मेरुसमुद्भूतसुगन्धिचन्दनं
सुशीतलं पुष्टिकरं सदैव ॥
द्रव्यं सुगन्धि परमोत्तमोत्तम-
मुद्वर्तनं देव ! समर्पयामि ।

(१०)

वस्त्रम्—

पीताम्बरं रम्यमलौकिकं तथा
शोभाढ्य विद्युत्समवस्त्रमुत्तमम् ॥
तुभ्यं मया कृष्ण समर्प्यते प्रभो !
हे कृष्ण ? हे व्यापक ! हे रमेश ? ॥

(११)

यज्ञोपवीतम्—

रम्यं पवित्रं नवतन्तु निर्मितं
वर्णेन पीतं नवदेवतामयम् ॥
ग्रन्थित्रयं तत् त्रिगुणात्मकं शुभं
यज्ञोपवीतं च समर्पयामि ॥
(१२)

चन्दनम्—

देवार्चनायाखिलशास्त्रवर्णितं
श्रीखण्डनामाख्यमतीवनिर्मलम् ॥
अत्युत्तमं सौख्यकरं सुचन्दनं
तुभ्यं मयाकृष्ण ! समर्प्यते प्रभो ! ॥
(१३)

पुष्पादीनि—

रम्याणि नानाविध वृक्षजानि
श्वेतानि पुष्पाणि सुगन्धितानि ॥
दिव्यानि कृष्णातुलसीदलानि
माल्यानि चैवाद्य समर्पयामि ॥
(१४)

तीलाक्षतान्—

हे देव हे कृष्ण रमापते विभो
हे गोपिकानाथ जनार्दन प्रभो ॥
हे श्रीश हे केशव हे जगत्पते
तीलाक्षतान् कृष्ण समर्पयामि ॥
(१५)

धूपम्—

नानाविधं तन्निगमागमोक्तं
वनस्पतीनां रससंभवं शुभम् ॥
दिव्यं पवित्राष्टसुगन्धिसंयुतं
धूपं च कृष्णाय समर्पयाम्यहम् ॥
(१६)

दीपम्—

वर्त्तिर्घृतं वह्निरिति त्रयान्वितं
शुभ्रं सदा स्वच्छ प्रकाशमानम् ॥
ज्योतिर्मयं मङ्गलकारकं शुभं
दीपं च कृष्णाय समर्पयाम्यहम् ॥
(१७)

नैवेद्यम्—

स्वादिष्टमत्युत्तमदिव्यशर्करं
मिष्टान्नमत्यन्त मृदुं पवित्रकम् ॥
नैवेद्यकं गोघृतपक्वमुत्तमं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(१८)

पायसम्—

सुस्वादु गोदुग्धघृतादि संयुतं
देवार्चने योग्यपवित्रपायसम् ॥
भक्त्या प्रभो ! निर्मितस्वर्णपात्रे
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(१९)

शुद्धोजलम्—

आकाशगंगाजलमुत्तमं शिवं
श्री विष्णुनारायणपूजनार्थकम् ।।
एवं तुलस्यादलयुक्तमर्घ्यं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ।।
(२०)

ताम्बुलम्—

पूगीफलैला खदिराढ्यमुत्तमं
चूर्णादिभिश्चैवयुतं पवित्रकम् ।।
देवादि कार्यार्थं विनिर्मितं प्रभो ?
ताम्बूलकं कृष्ण ! समर्पयाम्यहम् ।।
(२१)

फलम्—

नानाविधं केवलसूर्यपक्वं
धात्रीफलं पेरूकमाम्रकर्कटीम् ।।
अक्षोटकं श्रीकदलीं च दाडिमं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ।।
(२२)

रत्नादिद्रव्यम्—

छत्रं च रत्नैर्जटितं प्रकाशकं
आदर्शकं चामरदिव्यकुण्डलम् ।।
नानाविधां रत्नसुवर्णपादुकां
तुभ्यं च कृष्णाय समर्पयाम्यहम् ।।
(२३)

दक्षिणाम्—

तेजोमयं शुभ्रसुवर्णरूप्यकं
वज्रादि रत्नैश्च सहैव दक्षिणाम् ।
भक्त्या मया ह्युत्तमश्रद्धया कृतां
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
[२४]

देशे च काले समयोद्भवानि ॥
बद्धाञ्जलि र्नम्रतया सुभक्त्या
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२७)

क्षमापनम्—

प्रभो ! हरे ! देव ? जपं न पूजां
ज्ञानं न जानामि न पाठ मन्त्रम् ॥
तथापि हे देव ? क्षमापनंकृतं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२८)

आरार्तिकम्—

आरार्तिकं तं कदलीसमुद्भवं
कर्पूरनामाख्यमतीव मङ्गलम् ॥
ज्योतिर्मयं सूर्यसमानकान्तिदं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२५)

प्रदक्षिणाम्—

सर्वाणि पापानि च यानि तानि
नश्यन्ति नाम्ना तव हे मुरारे ॥
नाम्नाचते देव प्रदक्षिणा कृता
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२६)

पुष्पाञ्जलीम—

पुष्पाणि हे देव ? सुगन्धितानि
देशे च काले समयोद्भवानि ॥
बद्धाञ्जलि नम्रतया सुभक्त्या
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२७)

क्षमापनम्—

प्रभो ! हरे ! देव ? जपं न पूजां
ज्ञानं न जानामि न पाठ मन्त्रम् ॥
तथापि हे देव ? क्षमापनंकृतं
तुभ्यं च कृष्णाय समर्पयाम्यहम् ॥
(२८)

प्रार्थना--

हे देवकीनन्दन ! कृष्णचन्द्र !
हे देव ! सर्वात्मक ? वासुदेव ! ॥
हे कृष्ण ! विष्णो ! ऽव्यय ! व्यापक ? प्रभो !
नित्यं प्रसन्नोभव हे मुरारे ? ॥
(२९)

रम्यं तुलस्या वनमालया युतं
वंश्या च चक्रेण सपीतवस्त्रम् ॥
पद्माक्षनीलाम्बुजश्यामलाङ्गं
त्वां द्रष्टुमिच्छामि सदैव विष्णो ! ।
(३०)

पाठफलप्राप्ति—

इत्थं पवित्रं परमामृतं हरिं
अलौकिकं केवलदिव्यमूर्तिम् ॥
अनन्तपारामृतमव्ययं प्रभुं
नारायणं केवल कृष्णपूजनम् ॥
(३१)

उत्थाय च ब्राह्ममुहूर्त मध्ये
ध्यात्वा परंब्रह्म हरिं सदैव ॥
कृत्वा शुभं मानसपूजनं हरेः
सर्वं फलं प्राप्स्यति कृष्ण भक्तः ॥
(३२)

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं मानसिक
कृष्णपूजनं सम्पूर्णम् ॥

श्री विष्णु द्वादशाक्षरस्तोत्रम्

अथ ध्यानम्

वन्दे चिन्मात्रमेकाक्षरमजममरं पूर्णमानन्दमात्रं
वन्दे सद्ब्रह्मरूपं हरविधिविबुधैर्ध्यायमानं सुपूज्यम् ॥
वन्दे सद्मन्त्रबीजं ऋषिगणनिकरैः स्तूयमानञ्च दिव्यं
वन्दे संसारसारं सकलगुणनिधिं वासुदेवं वरेण्यम् ॥ १ ॥

द्वादशाक्षरमन्त्रस्य ऋषिः प्रजापतिः स्मृतः ।
देवता वासुदेवश्च गायत्रीछन्द उच्यते ॥
(१)

ध्रुवो बीजं च हृच्छक्ति भुंक्तिमुक्त्योश्च प्राप्तये ।
कृत्वैवं विनियोगञ्च प्राणायामं चरेत् ततः ॥
(२)

पूरके षोडशावृत्या कुम्भके द्वादशस्मृतः ।
रेचके तु दशावृत्या प्राणायामविधिं चरेत् ॥
(३)

नासाग्रे लोचनकृत्वा मध्ये हृद्कमलेस्थितम् ।
ध्यायेन्नारायणं देवं व्यापकं ब्रह्मरूपिणम् ॥
(४)

शङ्खचक्रगदापद्मधरं नीलं चतुर्भुजम् ।
पीताम्बरधरं देवं विष्णुं कमललोचनम् ॥
(५)

तुलसीदलसंयुक्तवनमालासुशोभितम् ।
सुवर्णमुकुटं रम्यं दिव्यकुण्डलभूषितम् ॥
(६)

असङ्ख्यचन्द्रसंकाश साक्षाद्ब्रह्मसनातनम् ।
कैवल्यमोक्षदं सत्यरूपं विश्वात्मकं विभुम् ॥
(७)

अथवा राधिकानाथं द्विभुजं मुरलीधरम् ।
आजानुबाहुकं दिव्यवदनं श्यामसुन्दरम् ॥
(८)

मणिमन्मुकुटं तद्वत् कुण्डलं पीतवाससम् ।
कस्तूरीतिलकं यस्य ललाटे सर्वमोहनम् ॥
(९)

तुलसीमालया पद्ममालया मणिमालया ।
शोभितं शान्तिदं कृष्णमन्तर्हृत्कमलेस्थितम् ॥
(१०)

ध्यात्वैवं पुरुषं पूर्णं वासुदेवं सनातनम् ।
राजमन्त्रजपं कुर्याद् द्वादशाक्षरनामकम् ॥
(११)

जपान्ते श्रद्धयायुक्तः पाठं कुर्यात प्रयत्नतः ।
तं दृष्ट्वा भक्तिसंसक्तोवासुदेवः प्रसीदति ॥
(१२)

(ॐ) ओङ्कार मन्त्रमय पूज्य सद्क्षराय
पादत्रयाक्षरमयाय त्रयोश्वराय ॥
वेदत्रयाय त्रिगुणात्मत्रिदैवताय
तस्मै नमो भगवते परमामृताय ॥
(१३)

(न) नम्याय सर्व्वजनहृत्कमलस्थिताय
चांगुष्ठमात्रपुरूपाय विभुत्वगाय ॥
ज्योतिर्मयाय तिमिरान्तकनिर्मलाय
तस्मै नमो भगवते परमामृताय ॥
(१४)

(मो) मोक्षप्रदाय सुखदाय धनप्रदाय
ज्ञान प्रदाय सततं परमोज्वलाय ॥
ब्रह्मादिदेव निकरैश्च सुपूजिताय
तस्मै नमो भगवते परमामृताय ॥
(१५)

(भ) भक्तस्य दुःखदलनाय च रक्षकाय
धर्मस्य सन्ततमधर्मविनाशकाय ॥
नानावतारपृथिवीतलधारणाय
तस्मै नमो भगवते परमामृताय ॥
(१६)

(ग) गव्यप्रियाय सकलेप्सितसंप्रदाय
सत्यप्रवृद्धिकरणाय सुमङ्गलाय ॥
कृष्णावतारकरुणालयसद्व्रताय
तस्मै नमो भगवते परमामृताय ॥
(१७)

(य) वन्द्याय सर्वजगतां सुरसत्तमाय
वंशीविभूषितकराय मनोहराय ॥
नाना प्रपञ्च विलयोदय कारणाय
तस्मै नमो भगवते परमामृताय ॥
(१८)

(ते) तेषांहि दुष्टशिशुपालककंशकेशि
कालीयकालयवनादि खलेश्वराणाम् ॥
मानंविमर्द्य जगतीतल रक्षणाय
तस्मै नमो भगवते परमामृताय ॥
(१९)

(वा) वासांसि यस्य सकलानि तडिन्निभानि
रूपं नवीन घनसन्निभमाद्यवर्णम् ॥
नारायणाय नररूप—विभूषिताय
तस्मै नमो भगवते परमामृताय ॥
(२०)

(सु) सुन्दोपसुन्ददलनाय सुदर्शनाय
हृत्पद्मनिष्ठ शुभविग्रह शोभिताय ॥
सद्ब्रह्मचिद्घनपरात्परकेवलाय
तस्मै नमो भगवते परमामृताय ॥
(२१)

(दे) देवाय भक्तभवसागरतारणाय
दुर्दन्तवक्रशिशुपालक कर्दनाय ॥
लीलार्थमेव जगतीतलमागताय
तस्मै नमो भगवते परमामृताय ॥
(२२)

(वा) वायु स्तथैव वरुणोऽग्नि शशाङ्करुद्रा
इन्द्राश्विनीसुतकुबेरयमा अजश्च ॥
स्तुन्वन्ति यं सततमेव समस्त वेदाः
तस्मै नमो भगवते परमामृताय ॥
(२३)

(य) यस्याक्षरस्य निरवद्यनिरञ्जनस्य
संसारदुःखरहितस्य सुदुर्लभस्य ॥
जानन्तिनैवमहिमानमशेष जीवा
तस्मै नमो भगवते परमामृताय ॥
(२४)

द्वादशाक्षरनामाख्यं स्तोत्रं यद्रचितं मया ।
समर्पयामि देवाय कृष्णाय परमात्मने ॥

(२५)

द्वादशाक्षरसंयुक्तं स्तोत्रं सर्वोत्तमं शिवम् ।
यः पठेत् प्रातरुत्थाय ज्ञानं सद्यः स विन्दति ॥

(२६)

सदा सद्भक्तिभावेन ध्यात्वा हरिपदामृतम् ।
पाठमात्रेण सद्भक्तो गच्छेद्धि हरिमन्दिरम् ॥

(२७)

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं श्री विष्णु द्वादशाक्षरस्तोत्रं सम्पूर्णम् ॥

अष्टोत्तरशतश्लोकात्मकं मुरलीधरस्तोत्रम्

ध्यानम्

हृदयसुखदमेकं नित्यमानन्दकन्दं
परमपदमनन्तं पूर्णबोधात्मरूपम् ॥
अगुणसगुणमेकं श्यामलं दिव्यमूर्तिं
कमलनयनकृष्णं ब्रह्मरूपं नमामि ॥

जगद्वन्द्यं जगद्पूज्यं जगत्कारणकारणम् ।
जगदाधार श्रीकृष्णं तं वन्दे मुरलीधरम् ॥
(१)

सगुणं सुन्दरं श्यामं दर्शनीयं मनोहरम् ।
हृद्पद्माष्टदलावासं तं वन्दे मुरलीधरम् ॥
(२)

मुखं चन्द्रसमं यस्य ज्योतिःसूर्यसमं परम् ।
साक्षात् नारायणं कृष्णं तं वन्दे मुरलीधरम् ॥
(३)

रक्तपद्मसमं नेत्रं रक्तपद्मसमं पदम् ।
नीलाम्बुजश्यामलाङ्गं तं वन्दे मुरलीधरम् ॥
(४)

पद्मस्य मालया चैव शोभितं वनमालया ।
तुलसीमालयायुक्तं तं वन्दे मुरलीधरम् ॥
(५)

मुद्रिकाकंकणं रम्यं रत्नैर्जटितकुण्डलम् ।
सुवर्णपादुका यस्य तं वन्दे मुरलीधरम् ॥
(६)

मयूरपुच्छसंयुक्तं नानारत्नैश्च निर्मितम् ।
मुकुटं कान्तिदं यस्य तं वन्दे मुरलीधरम् ॥
(७)

करयोः कंकणं वेणुः शिवात्प्राप्तं सुदर्शनम् ।
कौस्तुभं हृदये यस्य तं वन्दे मुरलीधरम् ॥
(८)

सुगन्धिद्रव्यसंयुक्तं श्रीखण्डाख्यं पवित्रकम् ।
ललाटे शोभितं यस्य तं वन्दे मुरलीधरम् ॥
(९)

कस्तूरीतिलकं दिव्यं पीताम्बरधरं प्रभुम् ।
कृष्णं च परमानन्दं तं वन्दे मुरलीधरम् ॥
(१०)

श्यामं नटवरं कृष्णं बाललीलाकरं प्रभुम् ।
पित्रोश्च सुखदं नित्यं तं वन्दे मुरलीधरम् ॥
(११)

कदाचित् शकटस्याऽपि पादाभ्यां ताडनात्परम् ।
पातनं विहितं येन तं वन्दे मुरलीधरम् ॥
(१२)

पूतनायाः पयः पीत्वा प्राणं संशोष्य तत्क्षणात् ।
शान्तिर्वितरिता येन तं वन्दे मुरलीधरम् ॥
(१३)

कदाचित् मृत्तिकां भुक्त्वा नैव भुक्तं मयेति वै ।
मातरं छलकर्तारं तं वन्दे मुरलीधरम् ॥
(१४)

दृश्यतां वदनं मातः कथयित्वैव मातरम् ।
विश्वस्य दर्शकं देवं तं वन्दे मुरलीधरम् ॥
(१५)

कदाचिदिति हे मातः! स्वादिष्टं दधिदीयताम् ।
दधियाचनकर्तारं तं वन्दे मुरलीधरम् ॥
(१६)

कदाचिज्जातरोषः सन् दधिदुग्धस्य भाजनम् ।
भित्वा रोदनकर्तारं तं वन्दे मुरलीधरम् ॥
(१७)

कदाचिद्घृतचौर्यार्थं गोपीगेहमुपागतम् ।
घृतदध्यादि भोक्तारं तं वन्दे मुरलीधरम् ॥
(१८)

मातुः परिश्रमं ज्ञात्वा स्वयं दाम्नैवबन्धनात् ।
दामोदर इति ख्यातं तं वन्दे मुरलीधरम् ॥
(१९)

यशोदा प्राङ्गणे नित्यं वंशीवादनपूर्वकम् ।
नर्तनं कृतवन्तं च तं वन्दे मुरलीधरम् ॥
(२०)

कदाचित् नर्तनान्ते तु धूलिधूसरविग्रहम् ।
देवक्याः प्राङ्गणेऽटन्तं तं वन्दे मुरलीधरम् ॥
(२१)

गोपीनां बालकान् सर्वानाहूय नर्तनाय वै ।
दिव्यनर्तनकर्तारं तं वन्दे मुरलीधरम् ॥
(२२)

सवेणुं नर्तनं कृत्वा गोपीमानसमोहनम् ।
स्वयं मोहनरूपं च तं वन्दे मुरलीधरम् ॥
(२३)

मथुरायामभूद्जन्म लीला यस्य च गोकुले ।
वृन्दावनकिशोरञ्च तं वन्दे मुरलीधरम् ॥
(२४)

वृन्दावनविहाराय वृन्दावननिवासिनम् ।
वृन्दावनात्मरूपं च तं वन्दे मुरलीधरम् ॥
(२५)

सुरम्यं मधुरं स्वच्छं वंशीवादनपूर्वकम् ।
गोपीनां चित्तहर्त्तारं तं वन्दे मुरलीधरम् ॥
(२६)

राधया लालितं यस्य चरणाम्बुजमच्ययम् ।
गोपीभिर्वेष्टितं कृष्णं तं वन्दे मुरलीधरम् ॥
(२७)

गोपीमध्ये स्वयं कृष्णो गोपीकृष्णस्य चान्तरे ।
रासलीलाकरं कृष्णं तं वन्दे मुरलीधरम् ॥
(२८)

सर्वसौन्दर्यसंपन्नं माधुर्याचित्तहारकम् ।
सर्वैश्वर्यसुसम्पन्नं तं वन्दे मुरलीधरम् ॥
(२९)

वसुदेवसुपुत्रं च लोकवन्द्यं जगत्प्रियम् ।
श्रीनाथं द्वारिकानाथं तं वन्दे मुरलीधरम् ॥
(३०)

बलरामानुजं वन्द्यं पूजनीयं मनोहरम् ।
राधिकाऽऽराधितं कृष्णं तं मुरलीधरम् ॥
(३१)

जाम्बवन्त्याःपतिं कान्तं दिव्यं श्यामलकोमलम् ।
देवकीतनयं कृष्णं तं वन्दे मुरलीधरम् ॥
(३२)

द्विभुजं रुक्मिणीनाथं प्रद्युम्नजनकं हरिं ।
आधारं जगतामेकं तं वन्दे मुरलीधरम् ॥
(३३)
मायामोहिनीरूपेण मोहनार्थाय शङ्करम् ।
प्रसिद्धमोहिनीरूपं तं वन्दे मुरलीधरम् ॥
(३४)
मार्कण्डेयमुनिं मायादर्शनार्थं सुबालकम् ।
शयानं वटपत्रे च तं वन्दे मुरलीधरम् ॥
(३५)
गोविन्दं गोपिकानाथं गोपालं गोसुरक्षकम् ।
गोवर्धनधरं देवं तं वन्दे मुरलीधरम् ॥
(३६)
केशवं माधवाख्यातं रामनारायणात्मकम् ।
व्यापकं विष्णुरूपं च तं वन्दे मुरलीधरम् ।
(३७)
सर्वेन्द्रियाणां द्रष्टारं सर्वेशं गरुडध्वजम् ।
सर्वस्यात्मस्वरूप च तं वन्दे मुरलीधरम् ।
(३८)
गुरुं सर्वत्र सर्वेषां प्राणिनां स्वामिनं तथा ।
पूज्यपादस्वरूपं च तं वन्दे मुरलीधरम् ।
(३९)

सुमङ्गलं पदं यस्य साधवश्चाधिकारिणः ।
पश्यन्ति भगवद्भक्ताः तं वन्दे मुरलीधरम् ॥
(४०)

सुकोमलस्वरूपं यं ध्यायन्ति योगिनः सदा ।
गायन्ति सस्वरा वेदा स्तं वन्दे मुरलीधरम् ॥
(४१)

ब्रह्मा तथैव रुद्रश्च इन्द्राग्निवरुणाहियम् ।
जानन्ति द्वादशादित्या स्तं वन्दे मुरलीधरम् ॥
(४२)

नारदात्रिभृगुर्ब्रह्मवसिष्ठसनकादयः ।
ध्यायन्ति यत्पदं नित्यं तं वन्दे मुरलीधरम् ॥
(४३)

मार्कण्डेयस्तथा गार्ग्यो वाल्मीकिः कपिलोमुनिः ।
स्मरन्ति यत्पदं नित्यं तं वन्दे मुरलीधरम् ॥
(४४)

ऋषयो मनसाध्यात्वा पश्यन्ति चरणाम्बुजम् ।
यस्यार्चयन्ति वै देवा स्तं वन्दे मुरलीधरम् ॥
(४५ कृ)

व्यासश्च शुकदेवश्च ध्रुवः प्रह्लादः एव च ।
नमन्ति यत्पदं नित्यं तं वन्दे मुरलीधरम् ॥
(४६)

षडैश्वर्य सुसम्पन्नं ज्ञानवैराग्यदं शिवम् ।
उत्तमं भक्तियुक्तम् च तं वन्दे मुरलीधरम् ॥
(४७)

परंब्रह्म स्वयं कृष्णं धर्मस्थापनकारणम् ।
नाना रूपधरं दिव्यं तं वन्दे मुरलीधरम् ॥
(४८)

प्रलयाब्धिजलाद्वेदमुत्थाप्य स्थापनं कृतम्
मीनरूपधृतं येन तं वन्दे मुरलीधरम् ॥
(४९)

देवकार्यस्य सिध्यर्थं मलयाचल धारकम् ।
कूर्मरूपधरं कृष्णं तं वन्दे मुरलीधरम् ॥
(५०)

पातालात्पृथिवीं धृत्वा दंष्ट्राभ्यां स्थापनं कृतम् ।
येन वाराहरूपेण तं वन्दे मुरलीधरम् ॥
(५१)

न मानुषं न सिंहं च नृसिंहरूपधारकम् ।
प्रह्लादरक्षकं देवं तं वन्दे मुरलीधरम् ॥
(५२)

त्रिलोकं व्याप्य पद्भ्यां वै बलिमानविमर्दनम् ।
बटुं वामनरूपं च तं वन्दे मुरलीधरम् ॥
(५३)

जमदग्निसुपुत्रं च परशुरामनामकम् ।
तपस्विनं ज्ञानवन्तं तं वन्दे मुरलीधरम् ॥
(५४)

राक्षसं रावणं हन्तुं रक्षितुं जानकीमपि ।
रामरूपधरं देवं तं वन्दे मुरलीधरम् ॥
(५५)

रमन्ते योगिनो यस्मिन् रामाख्यं परमं प्रभुम् ।
मर्यादापुरूषं देवं तं वन्दे मुरलीधरम् ॥
(५६)

संसारसाररूपं च सर्वेषां प्राणिनां प्रियम् ।
तारकं रामनाम्नैव तं वन्दे मुरलीधम् ॥
(५७)

कंसं हन्तुं जगत्सर्वं रक्षणार्थं सनातनम् ।
स्वयं श्रीकृष्णरूपं च तं वन्दे मुरलीधरम् ॥
(५८)

नास्तिकानां मतं हन्तुं कर्तुं धर्मस्यपालनम् ।
धृतबुद्धावतारं च तं वन्दे मुरलीधरम् ॥
(५९)

म्लेच्छान् विनाश्य सत्यस्य स्थापनाय नृविग्रहम् ।
धृतकल्क्यवतारञ्च तं वन्दे मुरलीधरम् ॥
(६०)

ज्ञानिनामग्रगण्यं च त्रिमूर्तिरूपधारकम् ।
दत्तात्रेयस्वरूपं च तं वन्दे मुरलीधरम् ॥
(६१)

ऋषभश्चैव हंसश्च शुकश्च कपिलादयः ।
यस्यावतारभूताव तं वन्दे मुरलीधरम् ।।
(६२)

अष्टादशपुराणानि येन संरचितानि च ।
प्रसिद्धं व्यासनामानं तं वन्दे मुरलीधरम् ॥
(६३)

यान्यन्यान्य च रूपाणि ख्यातानि जगतीतले ।
तानि यस्यैव सर्वाणि तं वन्दे मुरलीधरम् ॥
(६४)

तेषां मध्येऽवताराणां साक्षाद् विष्णोः स्वरूपकम् ।
कृष्णनाम्ना समाख्यातं तं वन्दे मुरलीधरम् ॥
(६५

अलौकिकमिदं रूपं कृष्णनाम्ना समीरितम् ।
कलाषोडशसंपन्नं तं वन्दे मुरलीधरम् ॥
(६६)

चिन्मात्रमेकं सृष्टयादौ परब्रह्म द्वितीयकम् ।
स्वेच्छयात्त त्रिरूपं वै तं वन्दे मुरलीधरम् ॥
(६७)

महेशश्च हरिर्ब्रह्मा त्रयमेकात्मकेवलम् ।
सृष्ट्यर्थं त्रिगुणात्मानं तं वन्दे मुरलीधरम् ॥
(६८)

उत्पत्तौ ब्रह्मरूपं च हरिरूपश्च पालने ।
प्रलये शिवरूपं च तं वन्दे मुरलीधरम् ॥
(६९)

सर्वेषां प्राणिनां प्राणमाधारं चैव केवलम् ।
जगतामात्मरूपं च तं वन्दे मुरलीधरम् ॥
(७०)

अज्ञानां मानवदृशां दूरमप्राप्तिकारणम् ।
ज्ञानिनां हृदि संविष्टं तं वन्दे मुरलीधरम् ॥
(७१)

अंतर्बहिश्च सर्वत्राधश्चोर्ध्वञ्चैव सर्वतः ।
व्यापकं ह्यात्मरूपेण तं वन्दे मुरलीधरम् ॥
(७२)

यस्मादाकाशवायूश्च अनलश्च जलम् तथा ।
जायन्ते पृथिवी कृष्णात् तं वन्दे मुरलीधरम् ॥
(७३)

चित्तञ्चाहङ्कृतिबुद्धिश्चेन्द्रियाणि मनस्तथा ।
यस्माद् कृष्णात् प्रजायन्ते तं वन्दे मुरलीधरम् ॥
(७४)

सर्वे देवाश्च वेदाश्च शास्त्राणि विविधानि च ।
यस्मात्कृष्णात् प्रजायन्ते तं वन्दे मुरलीधरम् ॥
(७५)

भुवनानि च सर्वाणि सप्तलोकाश्च सागराः ।
यस्याद्देवात् प्रजायन्ते तं बन्दे मुरलोधरम् ॥
(७६)

स्थावरा जङ्गमाः सर्वे प्राणिनो भोगकारिणः ।
यस्माद् देवात् प्रजायन्ते तं वन्दे मुरलीधरम् ॥
(७७)

एते सर्वे विलीयन्ते यस्मिँ स्त्रैकोक्यकारणे ।
सर्वेषामात्मनि कृष्णे तं वन्दे मुरलीधरम् ॥
(७८)

अरूपं च स्वरूपं च नानारूपं च केवलम् ।
अशक्यं कथितुं देवं तं वन्दे मुरलीधरम् ॥
(७९)

वेदान्तवेद्यं चिन्तमात्रं ब्रह्माख्यं परमंपदम् ।
अद्वितीयस्वरूपं च तं वन्दे मुरलीधरम् ॥
(८०)

श्रेष्ठाः ब्रह्मविदश्चैव ब्रह्मजानन्ति यत्पदम् ।
साक्षात्सर्वात्मरूपं च तं वन्दे मुरलीधरम् ॥
(८१)

सर्वदास्मृतिवाक्यैश्च कथ्यते यत्परात्परम् ।
केवलं ब्रह्मचिद्रूपं तं वन्दे मुरलीधरम् ॥
(८२)

आत्मप्रदीपरूपं च साक्षिरूपं सनातनम् ।
अनन्तशक्तिरूपं च तं वन्दे मुरलीधरम् ॥
(८३)

मूलप्रकृतिरूपं च तथैव प्रकृतेः परम् ।
परब्रह्मस्वरूपञ्च तं वन्दे मुरलीधरम् ॥
(८४)

कैवल्यनाथमव्यक्तमजं कुटस्थमव्ययम् ।
निर्वाणे परमानन्दं तं वन्दे मुरलीधरम् ॥
(८५)

परात्परं परोक्षञ्च साक्षाद्ब्रह्म परं पदम् ।
चिन्मात्रं केवलानन्दं तं वन्दे मुरलीधरम् ॥
(८६)

स्वयमानन्दरूपं च ज्योतिरूपं सनातनम् ।
निजमेकाक्षरं ब्रह्म तं वन्दे मुरलीधरम् ॥
(८७)

आद्यन्तरहितं पूर्णं केवलं परमं पदम् ।
परानन्दं परकाष्ठं तं वन्दे मुरलीधरम् ॥
(८८)

त्रिकालाबाध्य सद्रूपं चिद्रूपं ज्ञान निर्मलम् ।
आनन्दं सुखरूपं च तं वन्दे मुरलीधरम् ॥
(८९)

चिद्रूपं सुखमानन्दं सच्चिदानन्दलक्षणम् ।
एवं लक्षणसम्पन्नं तं वन्दे मुरलीधरम् ॥
(९०

अकारं विश्वरूपञ्च ह्युकारं तैजसात्मकम् ।
प्राज्ञं मकाररूपञ्च तं वन्दे मुरलीधरम् ॥
(९१)

ओमित्यक्षरमानन्दमेकं चैवाद्वितीयकम् ।
सर्वेषां बीजरूपं वै तं वन्दे मुरलीधरम् ॥
(९२)

सर्वात्मरूपमेकं च निजात्मानन्दमव्ययम् ।
हृद्याकाशस्थितं नित्यं तं वन्दे मुरलीधरम् ॥
(९३)

जाग्रदादित्रयावस्थाव्यापकं भिन्नमेव च ।
केवलं साक्षिमात्रं च तं वन्दे मुरलीधरम् ॥
(९४)

शब्दादिविषयाद्भिन्नमिन्द्रियातीतमद्वयम् ।
साक्षिरूपञ्चसर्वेषां तं वन्दे मुरलीधरम् ॥
(९५)

भविष्याद् वर्तमानाच्च भूतकालाच्च यत् परम् ।
ताटस्थ्येन विद्यमानं तं वन्दे मुरलीधरम् ॥
(९६)

सूक्ष्मादत्यन्तसूक्ष्मं च चिन्मयं मानसात्परम् ।
स्थूले महाविराटं च तं वन्दे मुरलीधरम् ॥
(९७)

अजरामरमेकं च निष्क्रियं निर्गुणं तथा ।
निजबोधस्वरूपं च तं वन्दे मुरलीधरम् ॥
(९८)

एकं नित्यं च पूर्णं च ब्रह्मचिन्मात्रकेवलम् ।
सदाऽऽनन्दस्वरूपं च तं वन्दे मुरलीधरम् ॥
(९९)

निष्कलङ्कं निराख्यातं निर्मलं च निरञ्जनम् ।
निर्विकल्पस्वरूपं च तं वन्दे मुरलीधरम् ॥
(१००)

ऊर्ध्वं ह्यधोवहिश्चान्तरनन्तं चैव केवलम् ।
दूरान्तिकं च सर्वत्र तं वन्दे मुरलीधरम् ॥
(१०१)

सर्वदा निर्गुणं नित्यं सगुणं चापि कर्हिचित् ।
द्विभुजं सुन्दरं कृष्णं तं वन्दे मुरलीधरम् ।
(१०२)

बुद्धेरन्तर्गुहामध्ये कमलेऽष्टदलात्मके ।
कोटिसूर्यसमाभासं तं वन्दे मुरलीधरम् ॥
(१०३)

भक्तानां निर्मले चित्ते वसन्तं ज्ञानदं शुभम् ।
मोक्षदं कृष्णनामानं तं वन्दे मुरलीधरम् ॥
(१०४)

यत्र गत्वापुनर्जन्म नैव प्राप्नोति मानवः ।
कैवल्यमुक्तिधामाख्यं तं वन्दे मुरलीधरम् ॥
(१०५)

निष्कामा भगवद्भक्ता गच्छन्ति ब्रह्मयत्पदम् ।
तद्पदं ब्रह्मधामाख्यं तं वन्दे मुरलीधरम् ॥
(१०६)

सकलाधारमात्मानं भर्त्तारं प्राणिनां सदा ।
गुह्याद्गुह्यतरं कृष्णं तं वन्दे मुरलीधरम् ॥
(१०७)

अत्यन्तानन्दरूपं च शोभनानां च शोभनम् ।
प्रसन्नवदनं कृष्णं तं वन्दे मुरलीधरम् ॥
(१०८)

अष्टोत्तर श्लोकशतं पवित्रं
हरे प्रपन्नः मुरलीधरात्मकम् ॥
बद्ध्वाञ्जलिं कृष्ण परात्पराय
सच्चित्स्वरूपाय समर्पयामि ॥
(१०९)

कृष्णस्य दिव्यं मुरलीधराख्य--
मष्टोत्तरश्लोकशतात्मकं स्तवम् ॥
पठन्ति बद्धाञ्जलियोजना ये
मुकुन्दपादाम्बुजचिन्तने रताः ॥
(११०)

शृण्वन्ति श्रद्धासहितं दिने दिने
गायन्ति वा भक्तजनस्य सिन्नधौ ॥
इच्छन्ति यद्यत् फलमाप्य तत्तद्
गच्छन्ति वैकुण्ठपदं हरेः प्रियम् ॥
(१११)

अष्टोत्तरशतावृत्तिं पठन्ति विधिपूर्वकम् ।
ये ते सर्वविधां सिद्धिं प्राप्नुवन्ति न संशयः ॥
(११२)


जन्माष्टम्यां हरिं नत्वा निराहारव्रती नरः ।
शतावृतिं पठित्वा च फलमिप्सितमाप्स्यति ॥
(११३)

निष्कामभावसंयुक्तो पठन् जन्माष्टमी दिने ।
वैकुण्ठवासमाप्नोति नैवजन्म पुनर्भवेत् ॥
(११४)

उत्तमे कार्त्तिके मासे मुरलीधर संज्ञकम् ।
स्तोत्रं पठन्ति ये तेषां प्रसन्नोभगवान् हरिः ॥
(११५)

पठन्ति हरिबोधिन्यां शतावृत्तिं तु ये जनाः ।
इहैश्वर्यसुखं भुक्त्वा यान्त्यन्ते श्रीहरेः पदम् ॥
(११६)

श्री गायत्रीस्वरूप ब्रह्मचारिणा विरचितं--
अष्टोत्तरशतश्लोकात्मकं
मुरलीधरस्तोत्रं
सम्पूर्णम् ॥



श्री गणेशाय नमः

❋ श्री रामाष्टकम् ❋

रामं प्रातर्ब्राह्ममुहूर्ते स्मरणीयं
रामं मध्ये क्षणदाकाले भजनीम् ॥
रामं कालातीतमखण्डं निजबोधं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥
(१)

रामं ह्येकं पूर्णप्रकाशं घननीलं
रामं सत्यं पद्मसमानं कमनीयम् ॥
रामं ध्येयं ज्ञेयमजस्राक्षररूपं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥
(२)

रामं ब्रह्माच्युतशिववन्द्यं जपनीयं
रामं वेदत्रयभजनीयं स्तवनीयम् ॥
रामं नित्यं चिद्घनरूपं प्रणवाख्यं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥
(३)

रामं सीताकान्तसमाख्यं सुखरूपं
रामं ज्येष्ठं लक्ष्मणपूज्यं रघुनाथम् ॥
रामं शत्रुघ्नस्य सुपूज्यं भरतस्य
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥

(४)

रामं सर्वान्तर्गतरूपं रमणञ्च
रामं नीलं पङ्कजनेत्रं वदनञ्च ॥
रामं दिव्यं निलसरोजैः समरूपं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥

(५)

रामं हस्ते वाणधनुष्कं रमणीयं
रामं पीताम्बरपरिधानं सुखदं च ॥
रामं भक्तत्राणपरं तं परमेशं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥

(६)


रामं जाग्रत्स्वप्नसुषुप्त्यादिकभिन्नं
रामं कामक्रोधमदाद्यै रहितं च ॥
रामं शुद्धं चिद्घनरूपं श्रुतिवेद्यं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥

(७)

रामं बुद्ध्यन्तर्गतविम्बं बहुरूपं
रामं सत्यज्ञानमनन्तं विमलञ्च ॥
रामं शुभ्रं तिमिरातीतं सूर्यसमं
रामं रम्यं व्यापकरूपं प्रणतोऽस्मि ॥
(८)

रामनामामृतं दिव्यं पवित्रं पुण्यदायकम् ।
अर्पयाम्यष्टकं राम प्रसन्नोभव सर्वदा ॥
(९)

श्री गायत्रीस्वरूप ब्रह्मचारीणा विरचितं
॥ श्री रामाष्टकं सम्पूर्णम् ॥



॥ श्री गणेशाय नमः ॥

हिन्दी में

* (श्री शिव प्रार्थना) *

जय शम्भो शिव, जय सुखदायक, जयसुरनायक, जयशम्भो ।
जय त्रिपुरारी, जगहितकारी, जय असुरारी, जय शम्भो ॥
जय अविनाशी घट-घटबासी, करूणारासी, जय शम्भो ।
दीन दयाला, परमकृपाला, सबके प्यारे, जय शम्भो ॥
जगके सर्जक, जगके पालक, जगके नाशक, जय शम्भो ।
जय सुखसागर, जय गंगाधर, जय जगतारक, जय शम्भो ।
अलख निरंजन, मुनिमनरंजन, सबदुखभंजन, जय शम्भो ।
भव भय नाशक, मोक्षप्रकाशक, सुरमुनि नायक, जय शम्भो ॥
डिम डिम डमरू, पुनरपि खप्परू, हाथ कमण्डल, जय शम्भो ।
कटिवागम्बर, भस्मत्रिपुण्डक, कंकण सुन्दर, जय शम्भो ॥
सर्पकी माला, नयनविशाला, वर्णउजाला, जय शम्भो ।
कैलास बिहारी, शिवसुखकारी, मुक्तिहमारी, जय शम्भो ॥
पारवतीपति, हम सबके गति, देनाशुभमति, हे शम्भो ।
भव से बचाना, शरणमें लेना, दर्शन देना, हे शम्भो ॥
आप तो ज्ञानी, औघड़दानी, सबके स्वामी, हेशम्भो ।
भक्त जनों के, सुन्दर मनको, सत्सुख देना, हे शम्भो ॥
जय शिव हर हर, सब दिन कहकर, स्तुति करता, हे शम्भो ।
अब तो ज़गमग ज्योतिरूप से, दर्शन देना, हे शम्भो ॥

श्री गायत्रीस्वरूप ब्रह्मचारीविरचित

॥ श्री शिव प्रार्थना सम्पूर्ण ॥

॥ श्री गणेशाय नमः ॥

* शिव स्मरणम् *

शिव मन्दिर में बैठकर दिन दिन,
शिवशंकर को पूजो सब दिन।
शिव में मन को नित्य लगाना,
निशिदिन हर हर शिव शिव जपना ॥१॥

संसार है सब स्वप्न सिनेमा,
माया का है दृश्य महिमा॥
इसमें अब तो भूल न जाना,
निसिदिन हर हर शिव शिव जपना ॥२॥

नाम जपो तुम शिवशंकर का,
खोलो परदा मन मन्दिर का॥
बीत्यो पल पल खाली न वसना,
निसिदिन हर हर शिव शिव जपना ॥३॥

सुन्दर शिव के नाम जपाकर,
बोलो मन से जय शिव हरहर॥
व्यापक शिवका दर्शन करना,
निसिदिन हर हर शिव शिव जपना ॥४॥

शिव शिव जपकर मुक्ति होगी,
सुख सम्पति को प्राप्ति होगी॥
शिवशङ्करको भूल न जाना,
निसिदिन हर हर शिव शिव जपना ॥५॥

श्री गायत्रीस्वरूप ब्रह्मचारीविरचित

॥ श्री शिवस्मरण सम्पूर्ण ॥

॥ श्री गणेशाय नमः ॥

* श्री राम आरती *

ॐ जय श्री राम हरे, प्रभु जय श्री राम हरे,
प्रभु के नाम निरन्तर २ जपकर पार तरे ॥ ॐ जय० ॥
तुम हो व्यापक नित्य सदा, रघुपति राम विभो ॥ प्रभु०रघु०॥
दशरथ आगन खेलत २ सबके प्राण प्रभो ॥ ॐ जय० ॥
तुम हो दशरथनन्दन, भूषण रघुकुल के ॥ प्र० ॥
तुम हो करुणासागर २ रक्षक सब जग के ॥ ॐ जय० ॥
दीनबन्धु दुःखनाशक, भक्तन के भय हारी ॥ प्र० ॥
भक्त विभीषणरक्षक २ रावण दुष्टखरारी ॥ ॐ जय० ॥
तुम हो मुनिमनरञ्जन, दुःख भञ्जन सुखकारी ॥ प्र० ॥
तुम हो घट घट व्यापक २ तुम साकेत बिहारी ॥ ॐ जय० ॥
तुम हो जग के पालक, तुम सबके हितकारी ॥ प्र० ॥
तुम हो ब्रह्मसनातन २ रामरूप धारी ॥ ॐ जय० ॥
अब हे राम सदा दिन, मम हृदय में वास करो ॥ प्र० ॥
अब तो झटपट करके २ भव से पार करो ॥ ॐ जय० ॥
आरती रामकी जो कोई, प्रेम से निसिदिन गावे ॥ प्र० ॥
यहाँ सुख सम्पति पाकर २ राम के लोक सिधारे ॥ ॐ जय० ॥
ॐ जय श्री राम हरे, प्रभु जय श्री राम हरे ॥ प्र० ॥
प्रभु के नामनिरन्तर २ जप कर पार तरे ॥ ॐ जय० ॥

श्री गायत्रीस्वरूप ब्रह्मचारीविरचित

॥ श्री राम आरती सम्पूर्ण ॥

॥ श्री गणेशाय नमः ॥

* श्री कृष्ण आरती *

ॐ जय श्री कृष्ण हरे, प्रभु जय श्री कृष्ण हरे,
प्रभुकानाम निरन्तर २ जप कर पार तरे ।ॐजय श्री कृष्ण हरे।
तुम हो सबके रक्षक, तुम सबके स्वामी ॥ प्रभु० ॥
तुम हो जग में व्यापक २ घट घट अन्तरयामी ॥ ॐ जय० ॥
करमें चक्रसुदर्शन, निसिदिन वंशी धारी ॥ प्रभु० ॥
कंशासूर वध करके २ सब जग सुखकारी ॥ ॐ जय० ॥
तुम हो एक परंपद, तुम ही मुक्ति हमारी ॥ प्रभु० ।
तुम हो प्राण हमारे २ गोवर्धन गिरधारी ॥ ॐ जय० ॥
भगवद्गीता हरि ने, अर्पण अर्जुन को ॥ प्रभु० ॥
घर घर सब जग गीता २ तत्व मिला जग को ॥ ॐ जय० ॥
तुम हो सत्यसनातन, तुम जग के हितकारी ॥ प्रभु० ॥
तुम हो अचल निरंजन २ तुम ही कृष्णमुरारी ॥ ॐ जय० ॥
तुम हो अजर निरूपम, तुम निर्गुण पद के ॥ प्रभु२ ॥
पार लगावो प्रभुजी २ भव भय बन्धन से ॥ ॐ जय० ॥
आरती सुन्दर कृष्णकी, जो कोई प्रेम से गावे ॥ प्रभु० ॥
यहां सुखसम्पतिपाकर २ हरि के लोक सिधारे ॥ ॐ जय० ॥
ॐ जय श्री कृष्ण हरे, प्रभु जय श्री कृष्ण हरे ॥ प्रभु० ॥
प्रभु का नाम निरन्तर २ जप कर पार तरे ॥ ॐ जय० ॥
॥ ॐ जय श्री कृष्ण हरे ॥

गायत्रीस्वरूप ब्रह्मचारी विरचित

॥ श्री कृष्ण आरती सम्पूर्ण ॥

मुद्रक :– हिन्द प्रिंटिंग वर्क्स, भदैनी, वाराणसी ।